✧˖°*❋ ❋*°˖✧

# राहु कवचम्
# Rahu Kavacham

✧˖°*❋ ❋*°˖✧

# राहु कवचम्

**ध्यानम्**

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।
सैंहिकेयं करालास्यं लोकानामभयप्रदम् ॥ 1॥

**। अथ राहु कवचम् ।**

नीलांबरः शिरः पातु ललाटं लोकवंदितः ।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरिरवान् ॥ 2॥

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम ।
जिह्वां मे सिंहिकासूनुः कंठं मे कठिनांघ्रिकः ॥ 3॥

भुजंगेशो भुजौ पातु नीलमाल्यांबरः करौ ।
पातु वक्षःस्थलं मंत्री पातु कुक्षिं विधुंतुदः ॥ 4॥

कटिं मे विकटः पातु ऊरू मे सुरपूजितः ।
स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा ॥ 5॥

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।
सर्वाण्यंगानि मे पातु नीलचंदनभूषणः ॥ 6॥

**फलश्रुतिः**

राहोरिदं कवचमृद्धिदवस्तुदं यो
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धि-
मायुरारोग्यमात्मविजयं च हि तत्प्रसादात् ॥ 7॥

॥ इति श्री महाभारते धृतराष्ट्र संजय संवादे द्रोण पर्वणि राहु कवचं संपूर्णम् ॥

✧ₓ''''''°*❋ ❋*°''''''ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net